# महाभारतम् व्यवहारदर्शनम्।

1. नार्थमल्पं परिभवेन्नावमन्येत शात्रवान्।
   बुद्ध्या तु बुद्ध्येदात्मानं न चाबुद्धिषु विश्वसेत्।।

2. धृतिर्दाक्षयं संयमो बुद्धिरात्मा
   धैर्यं शौर्यं देशकालाप्रमादः।
   अल्पस्य वा बहुनो वा विवृद्धौ
   धनस्येतान्यष्ट समिन्धनानि॥

3. क्षेमाक्षेमं च मार्गेषु समानि विषमाणि च ।
   अर्थिनां ये च वक्षयन्तिते नराः स्वर्गगामिनः॥

4. मातरं पितरं चैव शुश्रूषन्ति च ये नराः।
   भ्रातॄणामपि सस्नेहस्तेनराः स्वर्गगामिनः॥

5. अनमन्त्रितो न गच्छेत यज्ञं गच्छेत दर्शकः।
   अनर्चिते ह्यनायुष्यं गमनं तत्र भारत॥

6. मातापितृगुरूणां च कार्यमेवानुशासनम्।
   हितं चाप्यहितं चापि न विचार्यं नरर्षभ॥

7. वक्त्रप्रमाणान् पिण्डांश्च ग्रसेदेकैकशःपुनः।
   वक्त्राधिकं तु यत् पिण्डमात्मोच्छिष्टं तदुच्यते॥

8. पिण्डावशिष्टमन्यच्च वक्त्रान्निस्रुतमेव च.
   अभोज्यं तत् विजानीयाद् भुक्त्वा चान्द्रायणं व्रतम्॥

9. स्वमुच्छिष्टं तु यो भुङ्क्ते यो भुङ्क्ते मुक्तभोजनम्।
   चान्द्रायणं चरेत् कृच्छ्रं प्राजापत्यमथापि वा॥

10. पिबतःपतितो तोये भोजने मुखनिस्स्रुते।
    अभोज्यं तद् विजानीयाद् भुक्त्वा चान्द्रायणं चरेत्॥
11. पीतशेषं तु तन्नाम न पिबेत् पांडुनंदन।
    पिबेद् येदि हि तन्मोहाद् द्विजश्चांद्रायणं चरेत्॥

12. मौनी वाप्यथवा भूमौ नावलोक्य दिशस्तथा।
भुंजीत विधिवद्विप्रो न चोच्छिष्टं प्रदापयेत्॥

13. सदाचात्यशनं नाद्यान्नातिहीनं च कर्हिचित्।
यथान्नेन वृथा न स्यात् तथा भुंजीत नित्यशः॥

14. केशकीटोपपन्नं च मुखमारुतवीजितम्।
अभोज्यं तद् विजानीयाद् भुक्त्वा चांद्रायणं चरेत्॥

15. उत्थायच पुनस्पृष्टं पादस्पृष्टं च लंघितम्।
अन्नं तद् राक्षसं विद्यात् तस्मात् तत् परिवर्जयेत्॥

16. यद्युत्तिष्ठत्यनाचान्तो भुक्तवानासनात्ततः।
स्नानं सद्यः प्रकुर्वीत सोऽन्यथा प्रयतो भवेत्॥

17. नैकवासस्तु भुंजीयान्नचांतर्धाय वा द्विजः।
न भिन्नपात्रे भुंजीत पर्णपृष्ठे तथैव च॥

18. अन्न पूर्वं नमस्कुर्यात् प्रहृष्टेनांतरात्मना।
नान्यदालोकयेदन्नान्नजुगुप्सेत तत्परः॥

19. जुगुप्सितं च यच्चान्पं राक्षसा एव भुंजते।
पाणिना जलमुद्धृत्य कुर्यादन्नं प्रदक्षिणम्॥

20. आर्द्रपादस्तु भुंजीत नार्द्रपादस्तु संविशेत्।
आर्द्रपादस्तु भुंजानो वर्षाणां जीवते शतम्॥

21. त्रीणि तेजांसि नोच्छिष्टं आलभेत कदाचन।
अग्निं गां ब्राह्मणं चैव तथाह्यायुर्नरिष्यते॥

22. न पाणौ लवणं विद्वान् प्राश्नीयान्न च रात्रिषु।
दधिसक्तू न भुंजीत वृथा मांसं च वर्जयेत्॥

23. सायं प्रातश्च भुंजीत नांतराळे समाहितः।
बालेन तु न भुंजीत परश्राद्धं तथैव च॥

24. वाग्यतो नैकवस्त्रश्च नासंविष्टः कदाचन।
भूमौ सदैव नाश्नीयात् नानासीनो न शब्दवत्॥

25. तोयपूर्वं प्रदायान्नं अतिथिभ्यो विशाम्पते।
पश्चात् भुंजीत मेधावी नचाप्यन्यमना नरः॥

26. समानमेकपंक्त्या तु भोज्यमन्नं नरेश्वर।
विषं हालाहलं भुंक्ते योऽप्रदाय सुहृज्जने॥
27. पानीयं पायसं सक्तून् दधिसर्पिन्मधून्यपि।
निरस्य शेषमन्येषां न प्रदेयं तु कस्यचित्॥

28. भुंजानो मनुजव्याघ्र नैव शङ्कां समाचरेत्।
दधिचाप्यनुपानं वै न कर्तव्यं कदाचन॥

29. वर्जनीयांश्चैव नित्यं वै संख्यलो निशि भारत।
शेषाणि चैव पानानि पानीयं चापि भोजने॥

30. सौहित्यं न च कर्तव्यं रात्रौ न च समाचरेत्।
द्विजच्छेदं न कुर्वीत रात्रौ न च समाचरेत्॥

31. संध्यायां न च भुंजीत न स्नायेन्नतथा पठेत्।
प्रयतश्च भवेत्सत्यां न च किंचित्समाचरेत्॥

32. स्त्रियः पुरुषवेषेण पुंसः स्त्रीवेषधारिणः।

क्रीडारतिविहारेषु परां मुदमवाप्नुवन्॥

33. मातरं पितरं वृद्धमाचार्यमतिथिं गुरुम्।
गुरुत्वान्नाभिनन्दन्त कुमारान् नान्वपालयन्॥

34. न शौचमनुरुद्ध्यन्त तेषां सूदजनास्तथा।
मनसा कर्मणा वाचा भक्ष्यमासीदनावृतम्॥

अतिथि सेवनं:-

35. अतिथिं नावमन्येत नानृतं गिरमीरयेत्।
न पृच्छेद् गोत्रचरणं नाधीतं वा कदाचन॥

36. क्रोधमुत्पादितं हित्वा सुशीलो वीतमत्सरः।
अर्चयेदतिथिं प्रीतः परत्र हितभूतये॥

37. चंडालो वै श्वपाको वा काले यः कश्चिदागतः।
अन्नेन पूजनीयः स्यात् परत्र हितमिच्छता॥

38. अन्नदः प्राणदो लोके प्राणदः सर्वदो भवेत्।
तस्मादन्नं विशेषेण दातव्यं भूतिमिच्छता॥

39.बाल्ये विद्यां निषेवेत यौवने दारसंग्रहम्।
वार्धके मौनमातिष्ठेद् सर्वदा धर्ममाचरेत्॥

40. ब्राह्मणान् नावमन्येत गुरून् परिवदेन्न च।
यतीनामनुकूलस्यादेष धर्मःसनातनः॥

41. यतिर्गुर्द्विजातीनां वर्णानां ब्राह्मणो गुरुः।
पतिरेव गुरुःस्त्रीणां सर्वेषां पार्थिवो गुरुः॥

42.आचाराल्लभते ह्यायुराचाराल्लभते श्रियम्।
आचारात् कीर्तिमाप्नोति पुरुषः प्रेत्य चेह च॥

43. लोष्टमर्दी तृणच्छेदी नखखादी च यो नरः।
नित्योच्चिष्ठः संकुसको नेहायुर्विंदते महत्॥

44. प्रसाधनं च केशानां अंजनं दंतधावनं ।
पूर्वाह्णे एव कार्याणि देवतानां च पूजनम्॥

45. माध्यंदिने निशाकाले अर्धरात्रे च सर्वदा।
चतुष्पथं न सेवेत उभे संध्ये तथैव च॥

46. कृत्वा मूत्रपुरीषेतु रथ्यामाक्रम्य वा पुनः।
पादप्रक्षाळनं कुर्यात् स्वाध्याये भोजने तथा॥

47. ऊर्ध्वं प्राणा ह्युत्क्रमन्ति यूनःस्थविर आयति।
प्रत्यत्थानाभिवादाभ्यां पुनस्तान् प्रतिपद्यते॥

48.अभिवादीयत वृद्धांश्च दद्याच्चैवासनं स्वयम्।
कृतांजलिरुपासीत गच्छंतं पृष्ठतोऽन्वियात्॥

49.नास्तिक्यं वेदनिंदां च देवतानां च कुत्सनम्।
द्वेषस्तभोभिमानं च तैक्ष्ण्यं च परिवर्जयेत्॥

50. हीनांगानतिरिक्तांगान् विद्याहीनान् विगर्हितान्।
रूपद्रविणहीनांश्च सत्त्वहीनांश्च नाक्षिपेत्॥

51.आगमानां हि सर्वेषां आचारः श्रेष्ठ उच्यते।
आचारप्रभवो धर्मो धर्मादायुर्विवर्धते॥

52. न हिंस्यात् सर्वभूतानि मैत्रायणगतश्चरेत् ।
नेदं जन्मसमासाद्य वैरं कुर्वीत केनचित्॥

53. श्वः कार्यमद्य कुर्वीत पूर्वाह्णेचापराह्णिकम्।
न हि प्रतीक्षते मृत्युः कृतं वास्य न वाकृतम्॥

54.ईहमानः समारंभान् यदि नासादयेद् धनम्।
उग्रं तपः समारोहेन्न ह्यनुप्तं प्ररोहति॥